संहतानां समुच्चयः । ( यथा, श्रीकण्ठचरिते ।
६ । १८ ।
"नीरन्ध्रनिर्यत्सुमनोनिकाय-
कायावपङ्कप्रणयाद्दवीकः ॥")
निलयः । ( यथा, मनुः । १ । २६ ।
"एते मनूंस्तु सप्तान्यानसृजन् भूरितेजसः ।
देवान् देवनिकायांश्च महर्षींश्चामितौजसः ॥" )
परमात्मा । इति मेदिनी । ये, ८७ ॥
निकाय्यः, पुं, ( निचीयतेऽस्मिन् धान्यादिकमिति ।
नि+चि+"पाय्यसांनाय्यनिकाय्येति ।" ३ । १ ।
१२९ । इति ण्यत्प्रत्ययेन निपातनात्
साधुः । ) गृहम् । इत्यमरः । २ । २ । ५ ॥
( यथा, भट्टिः । ६ । ६६ ।
"न प्रणाय्यो जनः कच्चिन्निकाय्यं तेऽधितिष्ठति ।
देवकार्य्यविघाताय धर्म्मद्रोही महोदये ॥" )
निकारः, पुं, ( नि+कृ+घञ् । ) विप्रकारः ।
अपकारः । उत्कारः । धान्यस्योर्द्ध्वक्षेपणम् ।
इत्यमरभरतौ ॥ खलीकारः । इति स्वामी ॥
धिक्कारः । इति शब्दमाला ॥
निकारणं, क्ली, ( निकारयति क्षिणोत्यनेनेति ।
नि+कृ+णिच्+ल्युट् । ) मारणम् । वधः ।
इत्यमरः । २ । ८ । ११२ ॥
निकाशः, त्रि, ( निकाशते शोभतेऽनेन इति ।
काश दीप्तौ+करणे ल्युट् । ) नीकाशः । इत्य-
मरटीका ॥ ( तालव्यशकारान्तोऽपि दृश्यते ॥ )
निकुञ्चकः, पुं, ( निकुञ्चतीति । नि+कुन्च
कौटिल्ये+ण्वुल् । ) परिमाणविशेषः । कुडव-
पादः । स च प्रसृत इति ख्यातः । इति भरत-
धृतसर्व्वस्वम् ॥ वानीरवृक्षः । इति भावप्रकाशः ॥
( जलवेतसः । तत्पर्य्यायो यथा,—
"निकुञ्चकः परिव्याधो नादेयो जलवेतसः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥ )
निकुञ्चितं, क्ली, ( नि+कुञ्च+क्तः । ) अङ्ग-
हारान्तर्गतशिरोविशेषः । यथा,—
"आकम्पितं कम्पितञ्च धुतं विधुतमेव च ।
परिवाहितमाधूतमवधूतं तथाञ्चितम् ॥
आकुञ्चितं परावृत्तमुत्क्षिप्तञ्चाप्यधोगतम् ।
लोलितं प्रकृतञ्चेति चतुर्द्दशविधं शिरः ॥"
इति सङ्गीतदामोदरः ॥
निकुञ्जं, पुं क्ली, (नितरां कौ पृथिव्यां जायते इति ।
जन्+डः । पृषोदरादित्वात् मुमागमे साधुः ।)
कुञ्जम् । इत्यमरः । २ । ३ । ८ ॥ ( यथा,
आर्य्यासप्तशत्याम् । ४६६ ।
"इचिते निकुञ्जपत्रैर्भिक्षुकपात्रे ददाति याव-
न्नम् ।
पर्य्युषितमपि सुतीक्ष्णाश्वासकटुष्णं वधूरन्नम् ॥")
निकुञ्जिकाम्ला, स्त्री, ( निकुञ्जिका कुञ्जोद्भवा
अम्ला । ) कुञ्जिकाख्यक्षुपभेदः । तत्पर्य्यायः ।
कुञ्जिका २ कुञ्जवल्लरी ३ । इयं गुणैः श्रीवल्ली-
सदृशी । इति राजनिर्घण्टः ॥
निकुम्भः, पुं, कुम्भकर्णपुत्त्रः । ( यथा, रामायणे ।
६ । ७५ । ४६ ।
"स कुम्भश्च निकुम्भश्च कुम्भकर्णात्मजावुभौ ।
प्रेषयामास संक्रुद्धो राक्षसैर्बहुभिः सह ॥" )
दन्तिकावृक्षः । इति मेदिनी । भे, १७ ॥
( अस्य पर्य्यायो यथा,—
"विशाल्यन्ती निकुम्भः स्यादुपचित्रा मुकूलकः ।
दाक्षायणी विशल्या च तथोदुम्बरपर्ण्यपि ॥"
इति वैद्यकरत्नमालायाम् ॥ )
( प्रह्लादस्य पुत्त्रविशेषः । यथा, महाभारते ।
१ । ६५ । १९ ।
"प्रह्लादस्य त्रयः पुत्त्राः ख्याताः सर्व्वत्र भारत ।
विरोचनश्च कुम्भश्च निकुम्भश्चेति भारत ॥"
दनोः पुत्त्राणामन्यतमः । यथा, तत्रैव । १ ।
६५ । २५ ।
"निचन्द्रश्च निकुम्भश्च कुपटः कपटस्तथा ।
शरभः शलभश्चैव सूर्य्याचन्द्रमसौ तथा ।
एते ख्याता दनोर्वंशे दानवाः परिकीर्त्तिताः ॥"
स्वनामख्यातः क्षत्त्रियविशेषः । इति सह्याद्रि-
खण्डे । ३४ । ४४ ॥ महादेवस्य पार्श्वानुचर-
विशेषः । यथा, हरिवंशे । २६ । ४५ ।
"पार्श्वे तिष्ठन्तमाहूय निकुम्भमिदमब्रवीत् ।
गणेश्वरपुरीं गत्वा शून्यां वाराणसीं कुरु ॥"
तथा च रघुः । २ । ३५ ।
"अवेहि मां किङ्करमष्टमूर्त्तेः
कुम्भोदरं नाम निकुम्भमित्रम् ॥"
स्कन्दस्य सैनिकविशेषः । यथा, महाभारते ।
९ । ४५ । ५३ ।
"इमां नामानि चान्येषां येऽन्ये स्कन्दस्य
सैनिकाः ।
विविधायुधसम्पन्नाश्चित्राभरणवर्म्मिणः ।
शङ्कुकर्णो निकुम्भश्च पद्मः कुमुद एव च ॥"
हर्य्यश्वपुत्त्रविशेषः । यथा, हरिवंशे । १२ । २ ।
"धौन्धुमारिर्दृढाश्वस्तु हर्य्यश्वस्तस्य चात्मजः ।
हर्य्यश्वस्य निकुम्भोऽभूत् क्षत्त्रधर्म्मरतः सदा ॥")
निकुम्भाख्यवीजं, क्ली, ( निकुम्भाख्यस्य दन्तिका-
वृक्षस्य वीजवत् वीजं यस्य । ) जयपालः ।
इति राजनिर्घण्टः ॥ ( जयपालशब्देऽस्य
गुणादिकं ज्ञेयम् ॥ )
निकुम्भितं, क्ली, नृत्यविषयकाष्टोत्तरशतकरणान्त-
र्गतकरणविशेषः । यथा, सङ्गीतदामोदरे ।
"करणानान्तु सर्व्वेषां सामान्यं लक्षणन्त्विदम् ।
प्रायो वामकरो वक्षःस्थितोऽन्यः पुरतोऽनुगः ॥
पादाभ्यां करणं ज्ञेयं तद्विचारोत्तरं शतम् ।
निकुम्भितं पार्श्वक्रान्तमतिक्रान्तं विवर्त्तकम् ॥
विद्युद्भ्रान्तं गजक्रीडं क्रान्तश्च गरुडप्लुतम् ॥"
निकुम्भी, स्त्री, ( निकुम्भ+गौरादित्वात् ङीष् । )
दन्तीवृक्षः । इति राजनिर्घण्टः ॥
निकुरम्बं, क्ली, ( निकुरतीति । नि+कुर+बाहु-
लकात् अम्बच् । ) समूहः । इत्यमरः । २ ।
। ४० ॥ ( पुंलिङ्गेऽपि दृश्यते । यथा, श्रीकण्ठ-
चरिते । १८ । ४० ।
"आरक्तगण्डरुचिविद्रुमदत्तभाजो
यस्यास्ति फेननिकुरम्ब इवाट्टहासः ॥")
निकृतः, त्रि, ( नि+कृ+क्तः । ) प्रत्याख्यातः ।
शठः । इत्यमरः । ३ । १ । ४६ ॥ वञ्चितः ।
नीचः । इति मेदिनी । ते, ११६ ॥
निकृतिः, स्त्री, ( नि+कृ+क्तिन् । ) भर्त्सनम् ।
क्षेपः । शठः । शाठ्यम् । इति मेदिनी । ते,
११८ ॥ ( यथा, किराते । १ । ४५ ।
"न समयपरिरक्षणं क्षमन्ते
निकृतिपरेषु परेषु भूरिधामः ॥" )
दैन्यम् । इति शब्दरत्नावली ॥
निकृष्टः, त्रि, ( नि+कृष+क्तः । ) अधमः ।
इत्यमरः । ३ । १ । ५४ ॥ जात्याचारादि-
निन्दितः । इति भरतः ॥
निकेतः, पुं, ( निकेतति निवसत्यस्मिन्निति । नि+
कित निवासे+अधिकरणे घञ् ।) निकेतनम् ।
इत्यमरटीकायां भरतः ॥ ( यथा, देवीभाग-
वते । ४ । ११ । १२ ।
"तद्दा विनयं कृत्वा सामपूर्व्वं कृतेन वै ।
लिङ्गञ्च स्वनिकेतेषु मदागमनकाङ्क्षया ॥" )
निकेतनं, क्ली, ( निकेतति निवसत्यस्मिन्निति । नि
+कित+अधिकरणे ल्युट् । ) गृहम् । इत्य-
मरः । २ । २ । ४ ॥ ( यथा, देवीभागवते ।
१ । २० । ४२ ।
"विसर्ज्जिताथ सा तेन गता शाश्वन्निकेतनम् ।
उवाच तं वरारोहा राजानं मनसेप्सितम् ॥")
पलाण्डौ, पुं । इति शब्दचन्द्रिका ॥
निकोचकः, पुं, (निकोचति शब्दायते । नि+कुच
शब्दे+वुन् । ) अङ्कोटवृक्षः । इत्यमरः । २ ।
४ । २९ ॥ ( यथा, सुश्रुते । १ । ४६ ।
"वातामाक्षोडाभिषुकनिचुलपिचुनिकोचकोरु-
माणप्रभृतीनि ॥" क्वचित् क्लीवलिङ्गेऽपि दृश्यते ।
यथा,—
"वातामाक्षोडाभिषुकं मुकूलकनिकोचकम् ।
उरुमाणं प्रियालञ्च वृंहणं गुरुशीतलम् ॥"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये ॥)
निकोठकः, पुं, ( निकोचकः+पृषोदरादित्वात्
चस्य ठः । ) निकोचकः । इत्यमरटीकायां
भरतः ॥ ( यथा,—
"तिलः पियालाभिषुकौ विभीतका-
श्चित्राभयेरण्डमधूकसर्षपाः ।
कुसुम्भविल्वारुकमूलकातसी-
निकोठकाक्षोडकरञ्जशिग्रुजाः ॥
स्नेहाशयाः स्थावरसंज्ञितास्तथा
स्युर्ज्जङ्गमा मत्स्यमृगाः सपक्षिणः ॥"
इति चरके सूत्रस्थाने त्रयोदशेऽध्याये ॥ )
निक्वणः, पुं, (नि+क्वण शब्दे+"क्वणो वीणायाञ्च ।"
३ । ३ । ६५ । इति अप् । ) वीणाया अन्यस्य
च किन्नरादेः शब्दः । तत्पर्य्यायः । निक्वाणः २
क्वाणः ३ क्वणः ४ क्वणनम् ५ । इत्यमरः । १ । ७ ।
२४ ॥ प्रादेरप्युपसर्गादुत्तरस्य क्वणधातोः
प्रक्वाणः ६ प्रक्वणः ७ इत्यादयः प्रयोगा भवन्ति ।
आदिना सुक्वाणः सुक्वणः उपक्वाणः उपक्वणः
इत्यादयः । इति भरतः ॥